# Markandeyakritam 3 Vishnu Stotram

# मार्कण्डेयकृतं ३ विष्णुस्तोत्रम्

## Document Information

Text title : Markandeyakritam 3 Vishnu Stotram

File name : mArkaNDeyakRRitaM3viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | badarikAkhaNDa | adhyAya 3/54-62||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# मार्कण्डेयकृतं ३ विष्णुस्तोत्रम्

मार्कण्डेय उवाच ।
अशाश्वते च संसारे सारे ते चरणाम्बुजे ।
समुद्धारः कथं नृणां त्राहि मां परमेश्वर ॥ ५४॥

तापत्रयपरिश्रान्तमनेकाज्ञानजृम्भितम् ।
संसारकुहरे भ्रान्तं त्राहि मां कृपयाऽच्युत ॥ ५५॥

अनेकयोनियन्त्रेषु निःसृतेस्तनुवेदनाम् ।
गर्भवासकृतां प्राप्तं त्राहि मां करुणाम्बुधे ॥ ५६॥

कृमिभक्षितसर्वाङ्गं क्षुत्पिपासाकुलं च हि ।
आन्त्रमालाकुले गर्भे त्राहि मां मधुसूदन ॥ ५७॥

अमेध्यादिभिरालिप्तं निश्चेष्टश्रममाकुलम् ।
स्मरन्तं निजकर्मोत्थं त्राहि मां मधुसूदन ॥ ५८॥

वचनादाननिःश्वासाशक्तं भयमुपागतम् ।
गर्भवासमहादुःखं त्राहि मां मधुसूदन ॥ ५९॥

जरामरणबाल्यादिदुःखसंसारपीडितम् ।
दुःखाब्धौ सुखबुद्धिं मां कृपासिन्धो प्रपालय ॥ ३.३.६०॥

कदाचित्कृमितां प्राप्तं कदाचित्स्वेदजन्मिताम् ।
कदाचिदुद्भिज्जत्वं च कदाचिन्नरतां गतम् ॥ ६१॥

सर्वयोनिसमापन्नं विपन्नं विगतप्रभम् ।
अनाथं त्वां समापन्नं त्राहि मां कृपयाऽच्युत ॥ ६२॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे बदरिकाश्रममाहात्म्ये तृतीयाध्यायान्तर्गतं मार्कण्डेयकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । बदरिकाखण्ड । अध्याय ३/५४-६२॥

skandapurANa . vaiShNavakhaNDa . badarikAkhaNDa . adhyAya 3/54-62..

Proofread by PSA Easwaran

*Markandeyakritam 3 Vishnu Stotram*

pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*